॥ अष्टाध्यायी सूत्रपाठः॥

अथ शब्दानुशासनम्॥

अइउण् । ऋऌक् । एओङ् । ऐऔच् । हयवरट् । लण् । ञमङणनम् । झभञ् । घढधष् । जबगडदश् । खफछठथचटतव् । कपय् । शषसर् । हल् ॥

॥इति प्रत्याहारसूत्राणि॥

प्रथमोऽध्यायः

प्रथमः पादः

१ वृद्धिरादैच् ।
२ अदेङ् गुणः ।
३ इको गुणवृद्धी ।
४ न धातुलोप आर्धधातुके ।
५ क्ङिति च ।
६ दीधीवेवीटाम् ।
७ हलोऽनन्तराः संयोगः ।
८ मुखनासिकावचनोऽनुनासिकः ।
९ तुल्यास्यप्रयत्नं सवर्णम् ।
१० नाज्झलौ ।
११ ईदूदेद्द्विवचनं प्रगृह्यम् ।
१२ अदसो मात् ।
१३ शे ।
१४ निपात एकाजनाङ् ।
१५ ओत् ।
१६ संबुद्धौ शाकल्यस्येतावनार्षे ।
१७ उञ ऊँ ।
१८ ईदूतौ च सप्तम्यर्थे ।
१९ दाधा घ्वदाप् ।
२० आद्यन्तवदेकस्मिन् ।

२१ तरप्तमपौ घः ।
२२ बहुगणवतुडति संख्या ।
२३ ष्णान्ता षट् ।
२४ डति च ।
२५ क्तक्तवतू निष्ठा ।
२६ सर्वादीनि सर्वनामानि ।
२७ विभाषा दिक्समासे बहुव्रीहौ ।
२८ न बहुव्रीहौ ।
२९ तृतीयासमासे ।
३० द्वन्द्वे च ।
३१ विभाषा जसि ।
३२ प्रथमचरमतयाल्पार्धकतिपयनेमाश्च ।
३३ पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् ।
३४ स्वमज्ञातिधनाख्यायाम् ।
३५ अन्तरं बहिर्योगोपसंव्यानयोः ।
३६ स्वरादिनिपातमव्ययम् ।
३७ तद्धितश्चासर्वविभक्तिः ।
३८ कृन्मेजन्तः ।
३९ क्त्वातोसुन्कसुनः ।
४० अव्ययीभावश्च ।
४१ शि सर्वनामस्थानम् ।
४२ सुडनपुंसकस्य ।
४३ न वेति विभाषा ।
४४ इग् यणः सम्प्रसारणम् ।
४५ आद्यन्तौ टकितौ ।
४६ मिदचोऽन्त्यात् परः ।
४७ एच इग्घ्रस्वादेशे ।
४८ षष्ठी स्थानेयोगा ।
४९ स्थानेऽन्तरतमः ।
५० उरण् रपरः ।
५१ अलोऽन्त्यस्य ।
५२ ङिच्च ।

५३ आदेः परस्य ।
५४ अनेकाल्शित् सर्वस्य ।
५५ स्थानिवदादेशोऽनल्विधौ ।
५६ अचः परस्मिन् पूर्वविधौ।
५७ न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु ।
५८ द्विर्वचनेऽचि ।
५९ अदर्शनं लोपः ।
६० प्रत्ययस्य लुक्श्लुलुपः ।
६१ प्रत्ययलोपे प्रत्ययलक्षणम् ।
६२ न लुमताङ्गस्य ।
६३ अचोऽन्त्यादि टि ।
६४ अलोऽन्त्यात् पूर्व उपधा ।
६५ तस्मिन्निति निर्दिष्टे पूर्वस्य ।
६६ तस्मादित्युत्तरस्य ।
६७ स्वं रूपं शब्दस्याशब्दसंज्ञा ।
६८ अणुदित् सवर्णस्य चाप्रत्ययः ।
६९ तपरस्तत्कालस्य ।
७० आदिरन्त्येन सहेता ।
७१ येन विधिस्तदन्तस्य ।
७२ वृद्धिर्यस्याचामादिस्तद् वृद्धम् ।
७३ त्यदादीनि च ।
७४ एङ् प्राचां देशे ।

द्वितीयः पादः

१ गाङ्कुटादिभ्योऽञ्णिन् ङित् ।
२ विज इट् ।
३ विभाषोर्णोः ।
४ सार्वधातुकमपित् ।
५ असंयोगाल्लिट् कित् ।
६ इन्धिभवतिभ्यां च ।
७ मृडमृदगुधकुषक्लिशवदवसः क्त्वा ।

८ रुदविदमुषग्रहिस्वपिप्रच्छः संश्च ।
९ इको झल् ।
१० हलन्ताच्च ।
११ लिङ्सिचावात्मनेपदेषु ।
१२ उश्च ।
१३ वा गमः ।
१४ हनः सिच् ।
१५ यमो गन्धने ।
१६ विभाषोपयमने ।
१७ स्थाघ्वोरिच्च ।
१८ न क्त्वा सेट् ।
१९ निष्ठा शीङ्स्विदिमिदिक्ष्विदिधृषः ।
२० मृषस्तितिक्षायाम् ।
२१ उदुपधाद्भावादिकर्मणोरन्यतरस्याम् ।
२२ पूङः क्त्वा च ।
२३ नोपधात् थफान्ताद् वा ।
२४ वञ्चिलुञ्च्यृतश्च ।
२५ तृषिमृषिकृशेः काश्यपस्य ।
२६ रलो व्युपधाद्धलादेः संश्च ।
२७ ऊकालोऽज्झ्रस्वदीर्घप्लुतः ।
२८ अचश्च ।
२९ उच्चैरुदात्तः ।
३० नीचैरनुदात्तः ।
३१ समाहारः स्वरितः ।
३२ तस्यादित उदात्तमर्धह्रस्वम् ।
३३ एकश्रुति दूरात् संबुद्धौ ।
३४ यज्ञकर्मण्यजपन्यूङ्खसामसु ।
३५ उच्चैस्तरां वा वषट्कारः ।
३६ विभाषा छन्दसि ।
३७ न सुब्रह्मण्यायां स्वरितस्य तूदात्तः ।
३८ देवब्रह्मणोरनुदात्तः ।
३९ स्वरितात् संहितायामनुदात्तानाम् ।

४० उदात्तस्वरितपरस्य सन्नतरः ।
४१ अपृक्त एकाल्प्रत्ययः ।
४२ तत्पुरुषः समानाधिकरणः कर्मधारयः ।
४३ प्रथमानिर्दिष्टं समास उपसर्जनम् ।
४४ एकविभक्ति चापूर्वनिपाते ।
४५ अर्थवदधातुरप्रत्ययः प्रातिपदिकम् ।
४६ कृत्तद्धितसमासाश्च ।
४७ ह्रस्वो नपुंसके प्रातिपदिकस्य ।
४८ गोस्त्रियोरुपसर्जनस्य ।
४९ लुक् तद्धितलुकि ।
५० इद् गोण्याः ।
५१ लुपि युक्तवद् व्यक्तिवचने ।
५२ विशेषणानां चाजातेः ।
५३ तदशिष्यं संज्ञाप्रमाणत्वात् ।
५४ लुब् योगाप्रख्यानात् ।
५५ योगप्रमाणे च तदभावेऽदर्शनं स्यात् ।
५६ प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात् ।
५७ कालोपसर्जने च तुल्यम् ।
५८ जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम् ।
५९ अस्मदो द्वयोश्च ।
६० फल्गुनीप्रोष्ठपदानां च नक्षत्रे ।
६१ छन्दसि पुनर्वस्वोरेकवचनम् ।
६२ विशाखयोश्च ।
६३ तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम् ।
६४ सरूपाणामेकशेष एकविभक्तौ ।
६५ वृद्धो यूना तल्लक्षणश्चेदेव विशेषः ।
६६ स्त्री पुंवच्च ।
६७ पुमान् स्त्रिया ।
६८ भ्रातृपुत्रौ स्वसृदुहितृभ्याम् ।
६९ नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम् ।
७० पिता मात्रा ।
७१ श्वशुरः श्वश्र्वा ।

७२ त्यदादीनि सर्वैर्नित्यम् ।
७३ ग्राम्यपशुसंघेष्वतरुणेषु स्त्री ।

तृतीयः पादः

१ भूवादयो धातवः ।
२ उपदेशेऽजनुनासिक इत् ।
३ हलन्त्यम् ।
४ न विभक्तौ तुस्माः ।
५ आदिर्ञिटुडवः ।
६ षः प्रत्ययस्य ।
७ चुटू ।
८ लशक्वतद्धिते ।
९ तस्य लोपः ।
१० यथासंख्यमनुदेशः समानाम् ।
११ स्वरितेनाधिकारः ।
१२ अनुदात्तङित आत्मनेपदम् ।
१३ भावकर्मणोः ।
१४ कर्तरि कर्मव्यतिहारे ।
१५ न गतिहिंसार्थेभ्यः ।
१६ इतरेतरान्योऽन्योपपदाच्च ।
१७ नेर्विशः ।
१८ परिव्यवेभ्यः क्रियः ।
१९ विपराभ्यां जेः ।
२० आङो दोऽनास्यविहरणे ।
२१ क्रीडोऽनुसंपरिभ्यश्च ।
२२ समवप्रविभ्यः स्थः ।
२३ प्रकाशनस्थेयाख्ययोश्च ।
२४ उदोऽनूर्ध्वकर्मणि ।
२५ उपान्मन्त्रकरणे ।
२६ अकर्मकाच्च ।
२७ उद्विभ्यां तपः ।

२८ आङो यमहनः ।
२९ समो गम्यृच्छिभ्याम् ।
३० निसमुपविभ्यो ह्वः ।
३१ स्पर्धायामाङः ।
३२ गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः ।
३३ अधेः प्रसहने ।
३४ वेः शब्दकर्मणः ।
३५ अकर्मकाच्च ।
३६ संमाननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः ।
३७ कर्तृस्थे चाशरीरे कर्मणि ।
३८ वृत्तिसर्गतायनेषु क्रमः ।
३९ उपपराभ्याम् ।
४० आङ उद्गमने ।
४१ वेः पादविहरणे ।
४२ प्रोपाभ्यां समर्थाभ्याम् ।
४३ अनुपसर्गाद्वा ।
४४ अपह्नवे ज्ञः ।
४५ अकर्मकाच्च ।
४६ संप्रतिभ्यामनाध्याने ।
४७ भासनोपसंभाषाज्ञानयत्नविमत्युपमन्त्रणेषु वदः ।
४८ व्यक्तवाचां समुच्चारणे ।
४९ अनोरकर्मकात् ।
५० विभाषा विप्रलापे ।
५१ अवाद् ग्रः ।
५२ समः प्रतिज्ञाने ।
५३ उदश्चरः सकर्मकात् ।
५४ समस्तृतीयायुक्तात् ।
५५ दाणश्च सा चेच्चतुर्थ्यर्थे ।
५६ उपाद् यमः स्वकरणे ।
५७ ज्ञाश्रुस्मृदृशां सनः ।
५८ नानोर्ज्ञः ।
५९ प्रत्याङ्भ्यां श्रुवः ।

६० शदेः शितः ।
६१ म्रियतेर्लुङ्लिङोश्च ।
६२ पूर्ववत् सनः ।
६३ आम्प्रत्ययवत् कृञोऽनुप्रयोगस्य ।
६४ प्रोपाभ्यां युजेरयज्ञपात्रेषु ।
६५ समः क्ष्णुवः ।
६६ भुजोऽनवने ।
६७ णेरणौ यत्कर्म णौ चेत् स कर्तानाध्याने ।
६८ भीस्म्योर्हेतुभये ।
६९ गृधिवञ्च्योः प्रलम्भने ।
७० लियः संमाननशालीनीकरणयोश्च ।
७१ मिथ्योपपदात् कृञोऽभ्यासे ।
७२ स्वरितञितः कर्त्रभिप्राये क्रियाफले ।
७३ अपाद्वदः ।
७४ णिचश्च ।
७५ समुदाङ्भ्यो यमोऽग्रन्थे ।
७६ अनुपसर्गाज्ज्ञः ।
७७ विभाषोपपदेन प्रतीयमाने ।
७८ शेषात् कर्तरि परस्मैपदम् ।
७९ अनुपराभ्यां कृञः ।
८० अभिप्रत्यतिभ्यः क्षिपः ।
८१ प्राद्वहः ।
८२ परेर्मृषः ।
८३ व्याङ्परिभ्यो रमः ।
८४ उपाच्च ।
८५ विभाषाकर्मकात् ।
८६ बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः ।
८७ निगरणचलनार्थेभ्यश्च ।
८८ अणावकर्मकाच्चित्तवत्कर्तृकात् ।
८९ न पादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः ।
९० वा क्यषः ।
९१ द्युद्भ्यो लुङि ।

६२ वृद्भ्यः स्यसनोः ।
६३ लुटि च क्लृपः ।

चतुर्थः पादः

१ आ कडारादेका संज्ञा ।
२ विप्रतिषेधे परं कार्यम् ।
३ यू स्त्र्याख्यौ नदी ।
४ नेयङुवङ्स्थानावस्त्री ।
५ वामि ।
६ ङिति ह्रस्वश्च ।
७ शेषो घ्यसखि ।
८ पतिः समास एव ।
९ षष्ठीयुक्तश्छन्दसि वा ।
१० ह्रस्वं लघु ।
११ संयोगे गुरु ।
१२ दीर्घं च ।
१३ यस्मात् प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम् ।
१४ सुप्तिङन्तं पदम् ।
१५ नः क्ये ।
१६ सिति च ।
१७ स्वादिष्वसर्वनामस्थाने ।
१८ यचि भम् ।
१९ तसौ मत्वर्थे ।
२० अयस्मयादीनिच्छन्दसि ।
२१ बहुषु बहुवचनम् ।
२२ द्व्येकयोर्द्विवचनैकवचने ।
२३ कारके ।
२४ ध्रुवमपायेऽपादानम् ।
२५ भीत्रार्थानां भयहेतुः ।
२६ पराजेरसोढः ।
२७ वारणार्थानामीप्सितः ।

२८ अन्तर्धौ येनादर्शनमिच्छति ।
२९ आख्यातोपयोगे ।
३० जनिकर्तुः प्रकृतिः ।
३१ भुवः प्रभवः ।
३२ कर्मणा यमभिप्रैति स सम्प्रदानम् ।
३३ रुच्यर्थानां प्रीयमाणः ।
३४ श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः ।
३५ धारेरुत्तमर्णः ।
३६ स्पृहेरीप्सितः ।
३७ क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः ।
३८ क्रुधद्रुहोरुपसृष्टयोः कर्म ।
३९ राधीक्ष्योर्यस्य विप्रश्नः ।
४० प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता ।
४१ अनुप्रतिगृणश्च ।
४२ साधकतमं करणम् ।
४३ दिवः कर्म च ।
४४ परिक्रयणे सम्प्रदानमन्यतरस्याम् ।
४५ आधारोऽधिकरणम् ।
४६ अधिशीङ्स्थासां कर्म ।
४७ अभिनिविशश्च ।
४८ उपान्वध्याङ्वसः ।
४९ कर्तुरीप्सिततमं कर्म ।
५० तथायुक्तं चानीप्सितम् ।
५१ अकथितं च ।
५२ गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ ।
५३ हृक्रोरन्यतरस्याम् ।
५४ स्वतन्त्रः कर्ता ।
५५ तत्प्रयोजको हेतुश्च ।
५६ प्राग्रीश्वरान्निपाताः ।
५७ चादयोऽसत्त्वे ।
५८ प्रादय उपसर्गाः क्रियायोगे ।
५९ गतिश्च ।

६० ऊर्यादिच्विडाचश्च ।
६१ अनुकरणं चानितिपरम् ।
६२ आदरानादरयोः सदसती ।
६३ भूषणेऽलम् ।
६४ अन्तरपरिग्रहे ।
६५ कणेमनसी श्रद्धाप्रतीघाते ।
६६ पुरोऽव्ययम् ।
६७ अस्तं च ।
६८ अच्छ गत्यर्थवदेषु ।
६९ अदोऽनुपदेशे ।
७० तिरोऽन्तर्धौ ।
७१ विभाषा कृञि ।
७२ उपाजेऽन्वाजे ।
७३ साक्षात्प्रभृतीनि च ।
७४ अनत्याधान उरसिमनसी ।
७५ मध्येपदेनिवचने च ।
७६ नित्यं हस्ते पाणावुपयमने ।
७७ प्राध्वं बन्धने ।
७८ जीविकोपनिषदावौपम्ये ।
७९ ते प्राग् धातोः ।
८० छन्दसि परेऽपि ।
८१ व्यवहिताश्च ।
८२ कर्मप्रवचनीयाः ।
८३ अनुर्लक्षणे ।
८४ तृतीयार्थे ।
८५ हीने ।
८६ उपोऽधिके च ।
८७ अपपरी वर्जने ।
८८ आङ् मर्यादावचने ।
८९ लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः ।
९० अभिरभागे ।
९१ प्रतिः प्रतिनिधिप्रतिदानयोः ।

९२ अधिपरी अनर्थकौ ।
९३ सुः पूजायाम् ।
९४ अतिरतिक्रमणे च ।
९५ अपिः पदार्थसंभावनान्ववसर्गगर्हासमुच्चयेषु ।
९६ अधिरीश्वरे ।
९७ विभाषा कृञि ।
९८ लः परस्मैपदम् ।
९९ तङानावात्मनेपदम् ।
१०० तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमा ।
१०१ तान्येकवचनद्विवचनबहुवचनान्येकशः ।
१०२ सुपः ।
१०३ विभक्तिश्च ।
१०४ युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः ।
१०५ प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च ।
१०६ अस्मद्युत्तमः ।
१०७ शेषे प्रथमः ।
१०८ परः संनिकर्षः संहिता ।
१०९ विरामोऽवसानम् ।